# Sankatamochana Shriramashtakam

# सङ्कटमोचन श्रीरामाष्टकम्

## Document Information

Text title : Sankatamochana Shriramashtakam

File name : saMkaTamochanashrIrAmAShTakam.itx

Category : raama, pradIptakumAranandа, aShTaka

Location : doc_raama

Author : (Copyright) Pradipta Kumar Nanda, Kendrapara, Orisa pknanda65 at gmail.com

Transliterated by : Pradipta Kumar Nanda

Proofread by : Pradipta Kumar Nanda

Acknowledge-Permission: (Copyright) Pradipta Kumar Nanda

Latest update : September 4, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# सङ्कटमोचन श्रीरामाष्टकम्

श्रीरघुनन्दन-पङ्कजलोचन मुक्तिमहाजन-रावणहारी
त्वं विभुशङ्कर-सर्वचराचर-धर्मविशारद-दैत्यविदारी ।
पाहि दयामय-कार्म्मुकशोभन-भूमिसुताधर-नीलशरीरी
सङ्कटमोचन-कोशलवन्दन लक्ष्मणपूर्वज-रामविहारी ॥ १॥

शान्तसुकोमल-नीरजसुन्दर-बन्धुविभीषण-पालनकारी
सूर्यकुलोद्भव-दाशरथिप्रिय-भारतभूषण-विश्वविहारी ।
वानर-भल्लुक-सेवित हे खर-दूषणदानव-मारणकारी
भक्तिमती-शबरी-कुलपालक-धीवरतारक-राक्षसवैरी ॥ २॥

ब्रह्म-दिवाकर-वह्निविनायक-वासववन्दित-शीतलवारि
पाशि-महेश-सुरार्चित-पङ्कज-पादमनोहर-हैमविधारी ।
दुर्गतिनाशन-दुःखविनाशन-मोहमहार्णव-तारणकारी
हे रघुनायक-कष्टविमोचक-संसृतितारक-जीवनधारी ॥ ३॥

मैथिलचर्चित-शङ्करकोदण्ड-खण्डित-मण्डित-दण्डकचारी
पञ्चवटीवन-चारणशेखर-पैतृकसत्य-सुपालनकारी ।
बालिविनाशन-अङ्गदभाजन वानरपुङ्गव-भक्तिविधारी
आदर्शशासक-घोषितराघव-विश्वजनाश्रय-पोषणकारी ॥ ४॥

हे करुणामय-भागवतोत्तम-नीलकलेवर-धारणकारी
भक्तिमहाधन-दायक-मायिक-मानवपुङ्गव-गोलकचारी ।
नाथमहाप्रभु-विश्वसुरेश्वर-सार्थकभारत-भूमिविहारी
वैष्णवनायक-नाममहासुख-गायक-पार्वण-सौख्यविधारी ॥ ५॥

गौतम-कौशिक-ऋषिगणार्चित-भार्गवदर्प-विखण्डनकारी
दुष्टदशानन-मूलविनाशन-कौणपसङ्घ-विघातनभूरिः ।
वानरयूथ-महाबल-धारक-गैरिकवस्त्र-विधारणकारी
श्यामल-सुन्दर-नित्य-निरञ्जन-देवगणेश्वर-विष्णुमुरारिः ॥ ६॥

मञ्जुलदर्शन-कञ्जसुलोचन-निकुञ्जमोहन-धामविहारी
पिञ्जमहाधन-मानवरञ्जन-सज्जनमज्जन-पौरुषभारी ।
दानवपञ्जर-पातितदारुण-युद्धमहाजय-घोषविधारी
वैष्णवशास्त्र-विधारणशेखर-कालमहानल-नाशनकारी ॥ ७॥

अक्षयकीर्ति-गुणाश्रयकल्पित-कामविताडन-कल्मषहारी
दक्षनरेश्वर-मुक्तिसुरेश्वर-कारणकार्य-विशेषविधारी ।
भावविनोद-कलाकरमालिक-जूटसुशोभन-स्वस्तिकधारी
नीलवलाहक-मूर्तिमनोहर-तीर्थनियामक-यज्ञविहारी ॥ ८॥

इति नन्दप्रदीप्तकुमारविरचितं सङ्कटमोचन श्रीरामाष्टकं सम्पूर्णम् ।

Composed by Dr. Pradipta Kumar Nanda, Kendrapara, Orisa pknanda65 at gmail.com

*Sankatamochana Shriramashtakam*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*